श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ चतुःसप्ततितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ चतुःसप्ततितमः सर्गः ॥

## जाम्बवदादेशेन हनुमता हिमालयाद्दिव्यौषधीनां पर्वतस्यानयनं तासां गन्धेन श्रीरामलक्ष्मणयोः समेषां वानराणां च स्वास्थ्यलाभः

तयोस्तदासादितयो रणाग्रे
मुमोह सैन्यं हरियूथपानाम्।
सुग्रीवनीलाङ्गदजाम्बवन्तो
न चापि किञ्चित् प्रतिपेदिरे ते ॥ **6.74.1** ॥

ततो विषण्णं समवेक्ष्य सर्वं
विभीषणो बुद्धिमतां वरिष्ठः।
उवाच शाखामृगराजवीरा -
नाश्वासयन्नप्रतिमैर्वचोभिः ॥ **6.74.2** ॥

मा भैष्ट नास्त्यत्र विषादकालो
यदार्यपुत्रौ ह्यवशौ विषण्णौ।
स्वयम्भुवो वाक्यमथोद्वहन्तौ
यत्सादिताविन्द्रजितास्त्रजालैः ॥ **6.74.3** ॥

तस्मै तु दत्तं परमास्त्रमेतत्
स्वयम्भुवा ब्राह्ममोघवीर्यम्।
तन्मानयन्तौ युधि राजपुत्रौ
निपातितौ कोऽत्र विषादकालः ॥ **6.74.4** ॥

ब्राह्ममस्त्रं ततो धीमान् मानयित्वा तु मारुतिः।
विभीषणवचः श्रुत्वा हनूमानिदमब्रवीत्॥ **6.74.5** ॥

अस्मिन्नस्त्रहते सैन्ये वानराणां तरस्विनाम्।
यो यो धारयते प्राणांस्तं तमाश्वासयावहे॥ **6.74.6** ॥

तावुभौ युगपद् वीरौ हनूमद्राक्षसोत्तमौ।
उल्काहस्तौ तदा रात्रौ रणशीर्षे विचेरतुः॥ **6.74.7** ॥

भिन्नलाङ्गूलहस्तोरुपादाङ्गुलिशिरोधरैः।
स्रवद्भिः क्षतजं गात्रैः प्रस्रवद्भिः समन्ततः॥ **6.74.8** ॥

पतितैः पर्वताकारैर्वानरैरभिसंवृताम्।
शस्त्रैश्च पतितैर्दीप्तैर्ददृशाते वसुन्धराम्॥ **6.74.9** ॥

सुग्रीवमङ्गदं नीलं शरभं गन्धमादनम्।
जाम्बवन्तं सुषेणं च वेगदर्शिनमेव च॥ **6.74.10** ॥

मैन्दं नलं ज्योतिर्मुखं द्विविदं चापि वानरम्।
विभीषणो हनूमांश्च ददृशाते हतान् रणे॥ **6.74.11** ॥

सप्तषष्टिर्हताः कोट्यो वानराणां तरस्विनाम्।
अह्नः पञ्चमशेषेण वल्लभेन स्वयम्भुवः॥ **6.74.12** ॥

सागरौघनिभं भीमं दृष्ट्वा बाणार्दितं बलम्।
मार्गते जाम्बवन्तं च हनूमान् सविभीषणः॥ **6.74.13** ॥

स्वभावजरया युक्तं वृद्धं शरशतैश्चितम्।
प्रजापतिसुतं वीरं शाम्यन्तमिव पावकम्॥ **6.74.14** ॥

दृष्ट्वा समभिसङ्क्रम्य पौलस्त्यो वाक्यमब्रवीत्।
कच्चिदार्य शरैस्तीक्ष्णैर्न प्राणा ध्वंसितास्तव॥ **6.74.15** ॥

विभीषणवचः श्रुत्वा जाम्बवानृक्षपुङ्गवः।
कृच्छ्रादभ्युद्गिरन् वाक्यमिदं वचनमब्रवीत्॥ **6.74.16**॥

नैर्ऋतेन्द्र महावीर्य स्वरेण त्वाभिलक्षये।
विद्धगात्रः शितैर्बाणैर्न त्वां पश्यामि चक्षुषा॥ **6.74.17**॥

अञ्जना सुप्रजा येन मातरिश्वा च सुव्रत।
हनूमान् वानरश्रेष्ठः प्राणान् धारयते क्वचित्॥ **6.74.18**॥

श्रुत्वा जाम्बवतो वाक्यमुवाचेदं विभीषणः।
आर्यपुत्रावतिक्रम्य कस्मात् पृच्छसि मारुतिम्॥ **6.74.19**॥

नैव राजनि सुग्रीवे नाङ्गदे नापि राघवे।
आर्य सन्दर्शितः स्नेहो यथा वायुसुते परः॥ **6.74.20**॥

विभीषणवचः श्रुत्वा जाम्बवान् वाक्यमब्रवीत्।
शृणु नैर्ऋतशार्दूल यस्मात् पृच्छामि मारुतिम्॥ **6.74.21**॥

अस्मिञ्जीवति वीरे तु हतमप्यहतं बलम्।
हनूमत्युज्झितप्राणे जीवन्तोऽपि मृता वयम्॥ **6.74.22**॥

धरते मारुतिस्तात मारुतप्रतिमो यदि।
वैश्वानरसमो वीर्ये जीविताशा ततो भवेत्॥ **6.74.23**॥

ततो वृद्धमुपागम्य विनयेनाभ्यवादयत्।
गृह्य जाम्बवतः पादौ हनूमान् मारुतात्मजः॥ **6.74.24**॥

श्रुत्वा हनूमतो वाक्यं तदा विव्यथितेन्द्रियः।
पुनर्जातमिवात्मानं मन्यते स्मर्क्षपुङ्गवः॥ **6.74.25**॥

ततोऽब्रवीन्महातेजा हनूमन्तं स जाम्बवान्।
आगच्छ हरिशार्दूल वानरांस्त्रातुमर्हसि॥ **6.74.26**॥

नान्यो विक्रमपर्याप्तस्त्वमेषां परमः सखा।
त्वत्पराक्रमकालोऽयं नान्यं पश्यामि कञ्चन ॥ **6.74.27** ॥

ऋक्षवानरवीराणामनीकानि प्रहर्षय।
विशल्यौ कुरु चाप्येतौ सादितौ रामलक्ष्मणौ ॥ **6.74.28** ॥

गत्वा परममध्वानमुपर्युपरि सागरम्।
हिमवन्तं नगश्रेष्ठं हनूमन् गन्तुमर्हसि ॥ **6.74.29** ॥

ततः काञ्चनमत्युच्चमृषभं पर्वतोत्तमम्।
कैलासशिखरं चात्र द्रक्ष्यस्यरिनिषूदन ॥ **6.74.30** ॥

तयोः शिखरयोर्मध्ये प्रदीप्तमतुलप्रभम्।
सर्वौषधियुतं वीर द्रक्ष्यस्योषधिपर्वतम् ॥ **6.74.31** ॥

तस्य वानरशार्दूल चतस्रो मूर्ध्नि सम्भवाः।
द्रक्ष्यस्योषधयो दीप्ता दीपयन्तीर्दिशो दश ॥ **6.74.32** ॥

मृतसञ्जीवनीं चैव विशल्यकरणीमपि।
सुवर्णकरणीं चैव सन्धानीं च महौषधीम् ॥ **6.74.33** ॥

ताः सर्वा हनुमन् गृह्य क्षिप्रमागन्तुमर्हसि।
आश्वासय हरीन् प्राणैर्योज्य गन्धवहात्मज ॥ **6.74.34** ॥

श्रुत्वा जाम्बवतो वाक्यं हनूमान् मारुतात्मजः।
आपूर्यत बलोद्धर्षैर्वायुवेगैरिवार्णवः ॥ **6.74.35** ॥

स पर्वततटाग्रस्थः पीडयन् पर्वतोत्तमम्।
हनूमान् दृश्यते वीरो द्वितीय इव पर्वतः ॥ **6.74.36** ॥

हरिपादविनिर्भग्नो निषसाद स पर्वतः।
न शशाक तदात्मानं वोढुं भृशनिपीडितः ॥ **6.74.37** ॥

तस्य पेतुर्नगा भूमौ हरिवेगाच्च जज्वलुः।
शृङ्गाणि च व्यशीर्यन्त पीडितस्य हनूमता ॥ **6.74.38** ॥

तस्मिन् सम्पीड्यमाने तु भग्नद्रुमशिलातले।
न शेकुर्वानराः स्थातुं घूर्णमाने नगोत्तमे ॥ **6.74.39** ॥

सा घूर्णितमहाद्वारा प्रभग्नगृहगोपुरा।
लङ्का त्रासाकुला रात्रौ प्रनृत्तेवाभवत् तदा ॥ **6.74.40** ॥

पृथिवीधरसङ्काशो निपीड्य पृथिवीधरम्।
पृथिवीं क्षोभयामास सार्णवां मारुतात्मजः ॥ **6.74.41** ॥

आरुरोह तदा तस्माद्धरिर्मलयपर्वतम्।
मेरुमन्दरसङ्काशं नानाप्रस्रवणाकुलम् ॥ **6.74.42** ॥

नानाद्रुमलताकीर्णं विकासिकमलोत्पलम्।
सेवितं देवगन्धर्वैः षष्टियोजनमुच्छ्रितम् ॥ **6.74.43** ॥

विद्याधरैर्मुनिगणैरप्सरोभिर्निषेवितम्।
नानामृगगणाकीर्णं बहुकन्दरशोभितम् ॥ **6.74.44** ॥

सर्वानाकुलयंस्तत्र यक्षगन्धर्वकिन्नरान्।
हनूमान् मेघसङ्काशो ववृधे मारुतात्मजः ॥ **6.74.45** ॥

पद्भ्यां तु शैलमापीड्य वडवामुखवन्मुखम्।
विवृत्योग्रं ननादोच्चैस्त्रासयन् रजनीचरान् ॥ **6.74.46** ॥

तस्य नानद्यमानस्य श्रुत्वा निनदमुत्तमम्।
लङ्कास्था राक्षसव्याघ्रा न शेकुः स्पन्दितुं क्वचित् ॥ **6.74.47** ॥

नमस्कृत्वा समुद्राय मारुतिर्भीमविक्रमः।
राघवार्थे परं कर्म समीहत परन्तपः ॥ **6.74.48** ॥

स पुच्छमुद्यम्य भुजङ्गकल्पं
    विनम्य पृष्ठं श्रवणे निकुच्य।
विवृत्य वक्त्रं वडवामुखाभ -
    मापुप्लुवे व्योम्नि स चण्डवेगः॥ **6.74.49** ॥

स वृक्षखण्डांस्तरसा जहार
    शैलाञ्शिलाः प्राकृतवानरांश्च।
बाहूरुवेगोद्धतसम्प्रणुन्ना -
    स्ते क्षीणवेगाः सलिले निपेतुः॥ **6.74.50** ॥

स तौ प्रसार्योरगभोगकल्पौ
    भुजौ भुजङ्गारिनिकाशवीर्यः।
जगाम शैलं नगराजमग्र्यं
    दिशः प्रकर्षन्निव वायुसूनुः॥ **6.74.51** ॥

स सागरं घूर्णितवीचिमालं
    तदम्भसा भ्रामितसर्वसत्त्वम्।
समीक्षमाणः सहसा जगाम
    चक्रं यथा विष्णुकराग्रमुक्तम्॥ **6.74.52** ॥

स पर्वतान् पक्षिगणान् सरांसि
    नदीस्तटाकानि पुरोत्तमानि।
स्फीताञ्जनांस्तानपि सम्प्रवीक्ष्य
    जगाम वेगात् पितृतुल्यवेगः॥ **6.74.53** ॥

आदित्यपथमाश्रित्य जगाम स गतश्रमः।
हनूमांस्त्वरितो वीरः पितुस्तुल्यपराक्रमः॥ **6.74.54** ॥

जवेन महता युक्तो मारुतिर्वातरंहसा।
जगाम हरिशार्दूलो दिशः शब्देन नादयन्॥ **6.74.55** ॥

स्मरञ्जाम्बवतो वाक्यं मारुतिर्भीमविक्रमः।
ददर्श सहसा चापि हिमवन्तं महाकपिः॥ **6.74.56** ॥

नानाप्रस्रवणोपेतं बहुकन्दरनिर्झरम्।
श्वेताभ्रचयसङ्काशैः शिखरैश्चारुदर्शनैः।
शोभितं विविधैर्वृक्षैरगमत् पर्वतोत्तमम्॥ **6.74.57** ॥

स तं समासाद्य महानगेन्द्र -
 मतिप्रवृद्धोत्तमहेमशृङ्गम्।
ददर्श पुण्यानि महाश्रमाणि
 सुरर्षिसङ्घोत्तमसेवितानि॥ **6.74.58** ॥

स ब्रह्मकोशं रजतालयं च
 शक्रालयं रुद्रशरप्रमोक्षम्।
हयाननं ब्रह्मशिरश्च दीप्तं
 ददर्श वैवस्वतकिङ्करांश्च॥ **6.74.59** ॥

वह्न्यालयं वैश्रवणालयं च
 सूर्यप्रभं सूर्यनिबन्धनं च।
ब्रह्मालयं शङ्करकार्मुकं च
 ददर्श नाभिं च वसुन्धरायाः॥ **6.74.60** ॥

कैलासमग्र्यं हिमवच्छिलां च
 तं वै वृषं काञ्चनशैलमग्र्यम्।
प्रदीप्तसर्वौषधिसम्प्रदीप्तं
 ददर्श सर्वौषधिपर्वतेन्द्रम्॥ **6.74.61** ॥

स तं समीक्ष्यानलराशिदीप्तं
 विसिस्मिये वासवदूतसूनुः।

आप्लुत्य तं चौषधिपर्वतेन्द्रं
    तत्रौषधीनां विचयं चकार ॥ **6.74.62** ॥

स योजनसहस्राणि समतीत्य महाकपिः।
दिव्यौषधिधरं शैलं व्यचरन्मारुतात्मजः ॥ **6.74.63** ॥

महौषध्यस्ततः सर्वास्तस्मिन् पर्वतसत्तमे।
विज्ञायार्थिनमायान्तं ततो जग्मुरदर्शनम् ॥ **6.74.64** ॥

स ता महात्मा हनुमानपश्यं -
    श्चुकोप रोषाच्च भृशं ननाद।
अमृष्यमाणोऽग्निसमानचक्षु -
    र्महीधरेन्द्रं तमुवाच वाक्यम् ॥ **6.74.65** ॥

किमेतदेवं सुविनिश्चितं ते
    यद् राघवे नासि कृतानुकम्पः।
पश्याद्य मद्बाहुबलाभिभूतो
    विकीर्णमात्मानमथो नगेन्द्र ॥ **6.74.66** ॥

स तस्य शृङ्गं सनगं सनागं
    सकाञ्चनं धातुसहस्रजुष्टम्।
विकीर्णकूटं ज्वलिताग्रसानुं
    प्रगृह्य वेगात् सहसोन्ममाथ ॥ **6.74.67** ॥

स तं समुत्पाट्य खमुत्पपात
    वित्रास्य लोकान् ससुरासुरेन्द्रान्।
संस्तूयमानः खचरैरनेकै -
    र्जगाम वेगाद् गरुडोग्रवेगः ॥ **6.74.68** ॥

स भास्कराध्वानमनुप्रपन्न -
स्तं भास्कराभं शिखरं प्रगृह्य।
बभौ तदा भास्करसन्निकाशो
रवेः समीपे प्रतिभास्कराभः ॥ **6.74.69** ॥

स तेन शैलेन भृशं रराज
शैलोपमो गन्धवहात्मजस्तु।
सहस्रधारेण सपावकेन
चक्रेण खे विष्णुरिवार्पितेन ॥ **6.74.70** ॥

तं वानराः प्रेक्ष्य तदा विनेदुः
स तानपि प्रेक्ष्य मुदा ननाद।
तेषां समुत्कृष्टरवं निशम्य
लङ्कालया भीमतरं विनेदुः ॥ **6.74.71** ॥

ततो महात्मा निपपात तस्मिन्
शैलोत्तमे वानरसैन्यमध्ये।
हर्युत्तमेभ्यः शिरसाभिवाद्य
विभीषणं तत्र च सस्वजे सः ॥ **6.74.72** ॥

तावप्युभौ मानुषराजपुत्रौ
तं गन्धमाघ्राय महौषधीनाम्।
बभूवतुस्तत्र तदा विशल्या -
वुत्तस्थुरन्ये च हरिप्रवीराः ॥ **6.74.73** ॥

सर्वे विशल्या विरुजाः क्षणेन
हरिप्रवीराश्च हताश्च ये स्युः।
गन्धेन तासां प्रवरौषधीनां
सुप्ता निशान्तेष्विव सम्प्रबुद्धाः ॥ **6.74.74** ॥

**यदाप्रभृति लङ्कायां युध्यन्ते हरिराक्षसाः।**
**तदाप्रभृति मानार्थमाज्ञया रावणस्य च॥ 6.74.75॥**

ये हन्यन्ते रणे तत्र राक्षसाः कपिकुञ्जरैः।
हता हतास्तु क्षिप्यन्ते सर्व एव तु सागरे॥ **6.74.76**॥

ततो हरिर्गन्धवहात्मजस्तु
    **तमोषधीशैलमुदग्रवेगः।**
निनाय वेगाद्धिमवन्तमेव
    **पुनश्च रामेण समाजगाम॥ 6.74.77॥**

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे चतुःसप्ततितमः सर्गः॥